ized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CSS

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jal

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

First Edition

Number of Copies 1250

ADYAR LIBRARY

P
H 245. 2
Ram
SS xy

Copy Right

Hindi Prachar Press, Madras-17

2 MAY 1969
5

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jal

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

श्रीशिवस्तवमञ्जरी

१. श्रीमच्छंकरभगवत्पादविरचितं
श्रीशिवपञ्चाक्षरस्तोत्रम्
श्रीपद्मपादाचार्यविरचितवार्तिकेण संवलितम्

२. श्रीशिवरहस्यान्तर्गता
श्रीशिवाष्टोत्तरशतनामकल्पलता
श्रीभास्कररायाग्निचिद्विरचितया
रत्नावालाख्यया व्याख्यया च संवलिता

३. श्रीशिवस्तवराजः
श्रीभास्कररायाग्निचिद्विरचितः

पण्डित वाधूल वे. रामचन्द्रशर्मणा
संपाद्य, संशोधितः

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jal

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ஸ்ரீ குருப்யோ நம:

ஸ்ரீகாஞ்சீ காமகோடி பீடாதிபதி ஜகத் குரு ஸ்ரீசங்கராசார்யஸ்வாமிகளுக்கு கீலக வருஷம் ஐப்பசி மாதம் குருவாரத்தன்று டெல்லி மஹாஜனங்களால் ஸமஷ்டிபிக்ஷை யன்று, அவர்களுடைய ஸ்ரீ சரணங்களில் இந்நூல் ஸமர்ப்பணம் செய்வித்த பொழுது அவர்களால் அநுக்ரஹம் செய்யப் பெற்றது.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

शिवाभ्यां नमः

முன்னுரை

त्वदेकरक्तस्त्वत्पादपूजामात्रमहाधनः ।
कदा साक्षात्करिष्यामि भवन्तमयमुत्सुकः ॥

—என ஆன்றோர் அருளியவாறு இம்மானிடப் பிறவியின் பயன் ஈச்வரனிடம் இடையறாத பக்தியைச் செலுத்தி, அவனுடைய கல்யாண குணங்களை நினைத்துருகி, அவனுடன் தன்னை ஒன்றிக் கொண்டிருக்கச் செய்வது ஒன்றே தான் சிறந்த வழியாகும்.

பல துதிகளும், பல பக்தி நூல்களும் நமது பாரத நாட்டிலுள்ளது போல் வேறு எந்த நாட்டிலும் காணமுடியாது. இக்காரணம் கருதியே நமது பாரத நாடு இன்றும் சிறப்பாக விளங்கி வருகின்றது. ஈச்வரனை காக்ஷி கொண்ட பக்தர்களும், விதேஹ முக்தியடைந்த வித்தகர்களான துறவிகளும் இந்நாட்டில் பலர் இருந்தனர், இருந்தும் வருகின்றனர்.

எனவே, ஈசனிடம் அன்புடன் பக்தி செலுத்துவது என்பது நமக்கு வாழையடி வாழையாகத் தொன்று தொட்டு வந்துள்ள வரப்ரஸாதமுமாகும். இத்தகைய பக்தியும் நமது மனத்திலே நன்கு பதிந்து நிலையாய் நிற்பதற்கு ஆங்காங்கு அர்ச்சாவதாரமாய் எழுந்துள்ள ஆலயங்களையும் கொண்டு விளங்குவது நமது புனிதப் பாரதநாடு. பக்தி என்பது எல்லோருக்கும் பொதுவாயுள்ள சீரிய செல்வமாயமைந்துள்ளதால், பாமரர் முதல் பண்டிதர் வரையிலுள்ளவர்கள் இவ்வழியைக் கைப்பற்றிச் சிறந்து விளங்கலாமென்பதையும் நமது நாயன்மார்கள், ஆழ்வார்கள் முதலியவர்களுடைய வாழ்க்கை வரலாறுகளே நமக்குப் போதிய சான்றாக நின்று அறிவுறுத்துகின்றன.

ஆகவே, பக்தியைப் புகட்டும் நூல்கள் மக்களை நல்வழியிலே நிற்கச் செய்வதற்கு இன்று தோன்றாத் துணையாயிருப்பது அவசிய

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

l by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

மாகிறது. அக்காரணம் கொண்டு ஸ்ரீஸதாசிவனுடைய பெருமைகளைப் பெரிதும் போற்றுகின்ற மூன்று சீரிய நூல்களை ஒன்று திரட்டி புத்தக வடிவிலே வாசகர்களாகிய பக்தர்களுக்கு இங்கு வழங்கப் பெறுகின்றது.

முதல் நூல்—**ஸ்ரீசிவபஞ்சாக்ஷரஸ்தோத்திரம்.** இது ஸ்ரீ சங்கரபகவத்பாதரால் இயற்றப் பெற்றது. ஐந்து செய்யுட்களைக் கொண்டது. ஸ்ரீபஞ்சாக்ஷரத்திலுள்ள ஒவ்வொரு முதல் எழுத்தையும் ஒவ்வொரு செய்யுளின் ஈற்றடியிலே வைத்து ஐந்து செய்யுட்களால் அவைகளின் பெருமையை விளக்குவது. இச் சீரிய நூலுக்கு **ஸ்ரீபத்மபாதர்** செய்யுள் வடிவாயியற்றிய வார்த்திகம் என்னும் உரையும் இந்நூலோடு இணைந்துள்ளது. இவ்வுரை ஸ்ரீபஞ்சாக்ஷரத்தின் உட்பொருள் விளக்கங்களைப் பல கோணங்களில் படம் பிடித்துக் காட்டுவது போலச் சிறந்து விளங்குவது.

இரண்டாவது—ஸ்ரீசிவரஹஸ்யத்திலுள்ள **ஸ்ரீசிவாஷ்டோத்தரமாகும்.** இதற்கு **ஸ்ரீபாஸ்கரராயர்** என்னும் ஒப்புயர்வற்ற வித்தகர், சிவனுடைய பெருமைகளையும், லீலைகளையும் பல கோணங்களில் போற்றிப் புகழ்ந்து பெருமை கொள்கிறார். நூற்றெட்டு நாமாக்களுக்கும் நூற்றெட்டு யாப்பால் (வ்ருத்தம்) கண்டோர் வியக்கும் வண்ணம் உரையை இயற்றியுள்ளார்.

மூன்றாவது—**ஸ்ரீ சிவஸ்தவராஜம்.** இதுவும் ஸ்ரீபாஸ்கரராயரால் இயற்றப் பெற்றது. இது ஐம்பத்தாறு செய்யுட்களைக் கொண்டது. 'ஆர்யா' என்ற அழகிய ஒருவகை யாப்பிலே புனையப் பெற்றுள்ளது. படிப்பதற்குத் தெவிட்டாதது. மஹாசைவதுரந்தரரான **ஸ்ரீமதப்பயதீக்ஷிதர்** இயற்றிய **சிவத்யாநபத்ததியைப்** போன்றது. இவருக்கு தீக்ஷிதரிடம் இணையில்லா மதிப்புண்டு. தமது உரைகளிலே ஆங்காங்கு 'தீக்ஷிதேந்த்ரா:', என்ற உயரிய மதிப்புடன் அவருடைய நூல்களிலிருது மேற்கோள்கள் பல காட்டுகின்றார். மற்றும், இவ்விருவரும் முறையே சைவத்

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

l by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

திற்கும், சாக்தத்திற்கும் பெரிய பெரிய பணிகளைச் செய்துள்ளனர் என்பதும் இவ்விருவருடைய நூல்களை முற்றும் ஆராய்ந்தால் நன்கு விளங்கும்.

இவ்வஷ்டோத்தரத்திற்கு "ஸுதாபூரம்" என்ற சிறந்த உரையொன்றுமுள்ளது. இது மிகவும் விரிவானது. இதை யியற்றியவர் **ஸ்ரீவேங்கடபதி** என்னும் சைவராவர். இவருடைய உரையில் ஒவ்வொரு நாமாவுக்கும் க்ஷேத்ரம், லிங்கம், தீர்த்தம் என்ற இவைகளின் விளக்கங்களை, ச்ருதி, ஆகமம், புராணம் முதலியவைகளுடைய செய்யுட்களிலிருந்து மேற்கோள்களைக் கொண்டு விஸ்தாரமாக விளக்கியுள்ளதோடு, ஒவ்வொரு யாப்புக்கும்—(வ்ருத்தம்-மீட்டர்) அவைகளுக்குரிய இலக்கணங்களையும் விளக்கியுள்ளார். இவ்வுரை ஆராய்ச்சி செய்பவர்களுக்குப் பெரிதும் பயன்பெறுவது ஆதலின் இச் சிறுநூலில் இணைக்கவில்லை.

இத்தொகுதியிலுள்ள மூன்று நூல்களும் இதுவரையில் வெளிவந்ததாகத் தெரியவில்லை. எனவே பக்திநெறியிலே நிலைத்து நிற்க விரும்புகின்ற வாசகர்களுக்குப் பெரிதும் பயன்பெற வேண்டுமெனக் கருதி ஸ்ரீகாஞ்சீ காமகோடி பீடாதிபதிகளான ஜகத்குரு ஸ்ரீபரமாசார்யாளுடைய ஆதேசத்தையவலம்பித்து டில்லியிலுள்ள மஹா ஜனங்களால் வருஷம் தோறும் செய்கின்ற ஷஷ்டி பிக்ஷா வந்தனத்தன்று **ஸ்ரீசிவஸ்தவமஞ்ஜரீ** என்ற இந்நூல் வெளியிடப் பெறுகின்றது.

ஆகவே, ஸ்ரீசிவஸ்தவமஞ்ஜரீ என்ற இந்நூலை பக்தி நெறியிலே விழைய விரும்புகிற தொண்டர்களாம் அன்பர்கள் படித்து ஸ்ரீமஹாத்திரி புரஸுந்தரி ஸமேத ஸ்ரீசந்த்ரமௌளீச்வரருடையவும், ஸ்ரீமதாசார்யாளுடையவும் அருளைப் பெறுவதற்குத் தங்களைத் தகுதியுள்ளவர்களாகச் செய்து கொள்ளவேண்டுகிறேன்.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

l by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

शिवाभ्यां नमः

श्रीशिवरहस्यान्तर्गता श्रीशिवाष्टोत्तरशतनाम-स्तोत्रकल्पलता

अस्य श्रीशिवाष्टोत्तरशतनामकल्पलतास्तोत्रमहामन्त्रस्य नारायण ऋषिः। अनुष्टुप्छन्दः। श्रीउमामहेश्वरो देवता। ओं बीजम्। नमः शक्तिः। शिवाय कीलकम्। श्रीसाम्बसदाशिवप्रीतये जपादौ विनियोगः। मूलेन षडङ्गन्यासाः कार्याः। ध्यानम्—

धवलवपुषमिन्दोर्मण्डले संनिविष्टं
भुजगवलयहारं भस्मदिग्धाङ्गमीशम्।
हरिणपरशुपाणिं चारुचन्द्रार्धमौलिं
हृदयकमलमध्ये शंकरं चिन्तयामि ॥

ततः पञ्चोपचारान् कृत्वा, पठेत्—

ॐ शिवो महेश्वरः शंभुः पिनाकी शशिशेखरः।
वामदेवो विरूपाक्षः कपर्दी नीललोहितः ॥ १ ॥

शंकरः शूलपाणिश्च खट्वाङ्गी विष्णुवल्लभः।
शिपिविष्टोऽम्बिकानाथः श्रीकण्ठो भक्तवत्सलः ॥ २ ॥

भवः शर्वस्त्रिलोकेशः शितिकण्ठः शिवाप्रियः।
उग्रः कपाली कामारिरन्धकासुरसूदनः ॥ ३ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

l by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

गङ्गाधरो ललाटाक्षः कालकालः कृपानिधिः ।
भीमः परशुहस्तश्च मृगपाणिर्जटाधरः ॥ ४ ॥

कैलासवासी कवची कठोरस्त्रिपुरान्तकः ।
वृषाङ्को वृषभारूढो भस्मोद्धूलितविग्रहः ॥ ५ ॥

सामप्रियः स्वरमयस्त्रयीमूर्तिरनीश्वरः ।
सर्वज्ञः परमात्मा च सोमसूर्याग्निलोचनः ॥ ६ ॥

हविर्यज्ञमयः सोमः पञ्चवक्त्रः सदाशिवः ।
विश्वेश्वरो वीरभद्रो गणनाथः प्रजापतिः ॥ ७ ॥

हिरण्यरेता दुर्धर्षो गिरीशो गिरिशोऽनघः ।
भुजङ्गभूषणो भर्गो गिरिधन्वा गिरिप्रियः ॥ ८ ॥

कृत्तिवासाः पुरारातिर्भगवान् प्रमथाधिपः ।
मृत्युंजयः सूक्ष्मतनुर्जगद्व्यापी जगद्गुरुः ॥ ९ ॥

व्योमकेशो महासेनजनकश्चारुविक्रमः ।
रुद्रो भूतपतिः स्थाणुरहिर्बुध्न्यो दिगम्बरः ॥ १० ॥

अष्टमूर्तिरनेकात्मा सात्त्विकः शुद्धविग्रहः ।
शाश्वतः खण्डपरशुरजः पाशविमोचकः ॥ ११ ॥

मृडः पशुपतिर्देवो महादेवोऽव्ययो हरिः ।
पूषदन्तभिदव्यग्रो दक्षाध्वरहरो हरः ॥ १२ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

l by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

भगनेत्रभिदव्यग्रः सहस्राक्षः सहस्रपात् ।
अपवर्गप्रदोऽनन्तस्तारकः परमेश्वरः ॥ १३ ॥

फलश्रुति :—

इमानि दिव्यनामानि जप्यन्ते सर्वदा मया ।
नामकल्पलतेयं मे सर्वाभीष्टप्रदायिनी ॥ १४ ॥

नामान्येतानि सुभगे शिवदानि न संशयः ।
वेदसर्वस्वभूतानि नामान्येतानि वस्तुतः ॥ १५ ॥

एतानि यानि नामानि तानि सर्वार्थदान्यतः ।
जप्यन्ते सादरं नित्यं मया नियमपूर्वकम् ॥ १६ ॥

वेदेषु शिवनामानि श्रेष्ठान्यघहरणानि च ।
सन्त्यनन्तानि सुभगे वेदेषु विविधेष्वपि ॥ १७ ॥

अष्टोत्तरसहस्रं तु नाम्नामुपदिशत् पुरा ।
ततोऽपि सारमुद्धृत्याब्रवीदष्टोत्तरं शतम् ॥ १८ ॥

तानि नामानि जप्यन्ते मया प्रत्यहमादरात् ।
इत्युक्त्वा प्रणिपत्याम्बां संपूज्य च जनार्दनः ॥ १९ ॥

ततो जगाम वैकुण्ठं प्रेरितो जगदम्बया ।
शिवमाराधयन्ती सा गिरिजापि ततः शिवम् ॥ २० ॥

संप्राप्ता शिवरूपं सा भूयः प्राप्तशिवापि सा ।
एतदष्टोत्तरशतं नाम्नामाम्नायसंमितम् ॥ २१ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

यद्यदिच्छसि देवेशि तदनेनैव यास्यसि ।
शंकरस्य प्रिया गौरी जप्त्वा कालत्रयं सदा ॥ २२ ॥

नारायणोपदेशेन समाधिं परमं गता ।
समवाप्य शरीरार्धं प्रसादाच्छूलपाणिनः ॥ २३ ॥

ततः प्रभृति लोकेऽस्मिन्नर्धनारीश्वरः शिवः ।
यस्त्रिसंध्यं पठेच्छंभोर्नाम्नामष्टोत्तरं शतम् ॥ २४ ॥

सर्वान् कामानवाप्नोति भुक्तिं मुक्तिं च विन्दति ।
शतरुद्रियत्रिरावृत्त्या यत्फलं प्राप्यते नरैः ।
तत्फलं प्राप्नुयादेवमेकावृत्त्या पठेन्नरः ॥ २५ ॥

इति श्रीशिवरहस्यान्तर्गता
श्रीशिवाष्टोत्तरशतनामस्तोत्र-
कल्पलता संपूर्णा

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

l by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

ॐ नमः शिवाय,

श्रीमच्छंकरभगवत्पादविरचितं

शिवपञ्चाक्षरस्तोत्रम्

श्रीपद्मपादाचार्यविरचितवार्तिकेण संवलितम्

नागेन्द्रहाराय त्रिलोचनाय
भस्माङ्गरागाय महेश्वराय ।
नित्याय शुद्धाय दिगम्बराय
तस्मै नकाराय नमः शिवाय ॥ १ ॥

मन्दाकिनीसलिलचन्दनचर्चिताय
नन्दीश्वरप्रमथनाथमहेश्वराय ।
मन्दारमुख्यबहुपुष्पसुपूजिताय
तस्मै मकाराय नमः शिवाय ॥ २ ॥

शिवाय गौरीवदनाब्जवृन्द-
सूर्याय दक्षाध्वरनाशकाय ।
श्रीनीलकण्ठाय वृषध्वजाय
तस्मै शिकाराय नमः शिवाय ॥ ३ ॥

वसिष्ठकुम्भोद्भवगौतमार्य-
मुनीन्द्रदेवार्चितशेखराय ।
चन्द्रार्कवैश्वानरलोचनाय
तस्मै वकाराय नमः शिवाय ॥ ४ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

l by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

यक्षस्वरूपाय जटाधराय
पिनाकहस्ताय सनातनाय ।
दिव्याय देवाय दिगम्बराय
तस्मै यकाराय नमः शिवाय ॥ ५ ॥

"ॐ नमः शिवाय"

इति मन्त्रः ; तस्य व्याख्यानम्—

त्यागो हि नमसो वाच्य आनन्दः प्रकृतेस्तथा ।
फलं प्रत्ययवाच्यं स्यात् त्याज्यं पत्रफलादिकम् ।
त्यजामीदमिदं सर्वं चतुर्णामिह सिद्धये ॥
इति प्रथमं व्याख्यानम् (१)

अथवा नमसो वाच्यः प्रणामो दैन्यलब्धये ।
दैन्यं सेवा तथा ज्ञप्तिः सिद्धिः सर्वस्य वस्तुनः ॥
नमामि देवदेवेशं सकामोऽकाम एव वा ॥
इति द्वितीयं व्याख्यानम् (२)

नञा निषिध्यते भावविकृतिर्जगदात्मनः ।
मसनं देवदेवेश नेह नानास्तिशब्दतः ॥
अयेति गमयेत्यर्थे तस्माच्छुद्धोऽसि नित्यशः ।
प्रणामो देहदेहादेरभिमानस्य नाशनम् ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

l by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

शिवो ब्रह्मादिरूपः स्याच्छक्तिभिस्तिसृभिः सह ।
अथवा तुर्यमेव स्यान्निर्गुणं ब्रह्म तत्परम् ॥
नमसो नमने शक्तिर्नमनं ध्यानमेव वा ।
चतुर्थ्या तादात्म्यसंबन्धः कथ्यते प्रत्यगात्मनोः ॥
अहं शिवः शिवोऽहं च मन्ये वेदान्तनिष्ठया ।
इत्येवं नम इत्युक्तं वेदैः शास्त्रैश्च सर्वशः ॥
अथवा दास एवाहमहं दास इतीरणम् ।
इत्येव नम इत्युक्तं वेदैः शास्त्रैश्च सर्वशः ॥
अथवेदमिदं सर्वं त्यजामि परमाप्तये ।
अर्थं धर्मं च कामं च वाञ्छंश्च जगदीश्वरम् ॥
एतन्मन्त्रार्थतत्त्वज्ञैर्वेदवेदान्ततत्परैः ।
निर्णीतं तत्त्वगर्भं यद् विज्ञेयं मुक्तिलब्धये ॥
अथवा भुक्तिलाभाय ध्येयं तत्त्वविवेकतः ।
भिन्नं बुद्ध्वा हृदा देवं मंत्रेणेशं जगद्गुरुम् ॥
इति तृतीयं व्याख्यानम् (३)

नमेरचि नमः प्रोक्तो यन्तास्याज्जगदीश्वरम् ।
तस्माद् दासोऽहमित्येवं मत्वा मां प्रापयात्मनि ॥
तस्मिन् शेते जगत् सर्वं तन्मयं शब्दगामि यत् ।
तद्वानाच्छिव इत्युक्तं कारणं ब्रह्म तत्परैः ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

l by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

नमा यस्यास्ति लक्षीश सोऽहं देवो न संशयः ।
तस्मान्मे प्रापयेहैव लक्ष्मीं विद्यां सनातनीम् ॥
यस्मादानन्दरूपस्त्वं देवैर्वेदैर्निगद्यते ।
तस्मान्मे देहि योगीश भद्रं ज्ञानं सुभावनम् ॥

इति चतुर्थं व्ख्यानम् (४)

यस्मात् त्वं नेति नेतीति नञर्थं मासि वेदजम् ।
तस्मान्नमोऽसि भद्रं मे यतो जातोऽनमो नमः ॥
शिवं शिवमथाप्राप्तः शिवायेति निगद्यसे ।
शिवाय मे तथा प्राप्त्या शिवायं कुरु सर्वदा ॥

इति पञ्चमं व्याख्यानम् (५)

शिवं यतो महाभद्र नमोऽहं मायया ध्रुवम् ।
ततो नमाय मह्यं मः शिवाय कुरु सर्वदा ॥

इति षष्ठं व्याख्यानम् (६)

शिवं मेषियतो ज्ञप्त्या शिवायस्त्वं प्रपठ्यते ।
न ते माया यतो ज्ञप्त्या नमो वेदैः प्रपठ्यते ॥
नमोऽहं च शिवायोऽहं नमो मह्यं नमो नमः ।
नमो नमाय शुद्धाय मङ्गलाय नमो नमः ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

l by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

निर्गुणं निष्क्रियं शान्तमित्याद्याः श्रुतयो जगुः ।
नमो ब्रह्म निराकारं शिवायं शिव सर्वदा ।
अतोऽहं च नमा भद्र शिवायोऽहं न संशयः ॥
इति सप्तमं व्याख्यानम् (७)

इति श्रीमत्परमहंसपरिव्राजकाचार्य-
श्रीपद्मपादाचार्यविरचितं
श्रीशिवपञ्चाक्षरस्तोत्र-
वार्तिकं संपूर्णम्

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

ॐ नमः शिवाय

श्रीशिवरहस्यान्तर्गता शिवाष्टोत्तर-शतनामस्तोत्रकल्पलता

श्रीभास्कररायाग्निचिद्विरचित-
रत्नावालख्यया व्याख्यया च
संवलिता

—:०:—

मोक्षस्यैकनिदानमब्जनयनब्रह्मेन्द्रचन्द्रादिभि-
र्देवैः प्राणपदीकृतं कलिमलप्रध्वंसिधर्माङ्कुरः ।
भारत्यापि सुदुर्निरूपमहिम त्र्यय्यन्तरे गोपितं
वक्तुर्मङ्गलदं शिवेति विमलं नामैव नस्तारकम् ॥ १ ॥

आनन्त्यौदार्यसत्याहतिमृतिहृतिभिः स्वल्पसेवातितोषात्
संकष्टोच्छित्त्युपेक्षाभयहितवचनैरुत्तमत्वाच्च शंभुः ।
सेव्यो विष्णूपमन्युद्रुहिणमुनिसुतश्रीदमन्थेच्छुदेवै-
र्दक्षश्रीरामवेदैरशिशुपशुवधूराक्षसैः साक्षिभिर्नः ॥ २ ॥

नाथ त्वच्छक्तितत्त्वाव्ययचरितभगव्यूहमूर्त्यङ्गसाङ्ग-
प्रत्यङ्गोपाङ्गकृत्यागमभजनकलांशादिनिष्कर्षमूढाः ।
त्वन्नामापि त्यजामो यदि दुरितहरं सान्ववायाः कृतार्थाः
केनोपायेन जायेमहि कलिहतके जन्मभाजो वयं हि ॥ ३ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

y eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundatio

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

शिवेति द्वौ वर्णौ परपदपतद्धंसगरुतौ
तटौ संसाराब्धेः स्वविषयकबोधाङ्कुरदले ।
श्रुतेरन्तर्गोपायिततररहस्याहृतिचरौ
घरट्टग्रावाणौ भवविटपिबीजौघदलने ॥ ४ ॥

स्वामिन् कर्मणि कायिके न जरया शक्तोऽस्मि नो मानसे
चाञ्चल्यान्मनसो न निर्धनतया पूर्वेष्टदानादिके ।
तस्माद् वाचिकमेव कर्म विदुषां साध्यं विदित्वा भव-
न्नाम्नामष्टशतं निरुच्य जनुषः साफल्यमीहेतमाम् ॥ ५ ॥

शिवनामकल्पवल्ल्याः शिवचरितानन्दकाननभवायाः ।
रुचिरं रत्नावालं रचये सत्पद्यरत्नवरैः ॥ ६ ॥

इत्युपोद्घातः

अथ नामावलि :—

ॐ शिवाय नमः

प्रकृत्या नैर्मल्यादमलगुणयोगादपि शमा-
ज्जगत्याधारत्वाद् भजदमृतदानाच्च भवतः ।
बलादिच्छाशक्तेः प्रथितपुरि भद्रश्रव इति
प्रतीतस्त्वं लिङ्गे त्रिपुरहर तस्मादसि शिवः ॥ १ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

y eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundatio

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

ॐ महेश्वराय नमः

तवेश्वरत्वं त्रिजगद्विलक्षणं
त्वमीश्वराणां महतामपीश्वरः ।
जगत्तिरोधानकरः श्रुतीरित-
स्त्वं पञ्चविंशोऽपि परो महेश्वरः ॥ २ ॥

ॐ शंभवे नमः

शं भावयसि च भवसे शं भवसि चेति वा देवः ।
त्वं देवदारुविपिने लिङ्गे प्रथितोऽस्यतः शंभुः ॥ ३ ॥

ॐ पिनाकिने नमः

नाकोऽपि येन पिहितो मुनिकण्वमूर्ध-
वल्मीकवेणुजधनुस्त्रितयाग्रजन्मा ।
यः सप्तशीर्षफणिरूप उदारकर्मा
चापस्तमावहसि नाथ ततः पिनाकी ॥ ४ ॥

ॐ शशिशेखराय नमः

मतिमयोऽखिलजीवसमष्टिर-
प्यमथि दक्षमखे हिमगुर्वृथा ।
इति धिया दयया विधृतस्त्वया
शिरसि तेन भवान् शशिशेखरः ॥ ५ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

y eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundatio

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

ॐ वामदेवाय नमः

वामार्धेन क्रीडसि त्वं त्रिलोकी-
वक्राचारो वल्गुमोदोऽसि तस्मात् ।
विश्वोत्तीर्णः स्रष्टृतामप्यतीतः
प्रेयानात्मा कथ्यते **वामदेवः** ॥ ६ ॥

ॐ विरूपाक्षाय नमः

विषमाणि विविधशक्तीन्यक्षाणि विलक्षणानि वाक्षाणि ।
हर हेमकूटशैले लिङ्गे व्यक्तोऽस्यतो **विरूपाक्षः** ॥ ७ ॥

ॐ कपर्दिने नमः

नदीपूरैः शोधादथ सुरधुनीशोधनात् तत्प्रदानात्
कचग्रन्थेर्भेदोऽतिशयितगुणः स्यात् कपर्दो वराटः ।
तदाधारः पूरस्थगनमपि तत्पावनं तत्प्रकाश-
क्षमत्वं मैरालीं प्रथयसि तनुं छालगण्डे **कपर्दी** ॥ ८ ॥

ॐ नीललोहिताय नमः

नेमाङ्गनं प्रकृतिपूरुषं रवे-
रन्तश्च रूपयुगपद्वपुस्तव ।
वेधोऽलिकाम्बुकणतोऽरुणासिता-
ज्जातः शिवत्वमिति **नीललोहितः** ॥ ९ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

y eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundatio

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

ॐ शंकराय नमः

कर एव मुखे धत्से भक्तानां कुरुषे च तत् ।
पीठे चन्द्रपुराभिख्ये नाम्ना ख्यातोऽसि शंकरः ॥ १० ॥

ॐ शूलपाणये नमः

शिव तृप्तपुरस्थलिङ्गमध्ये
प्रकटः संस्त्रिगुणात्मकाललोकैः ।
शुचिभक्तिदशादिभिस्त्रिशूलं
विदधंस्त्वं प्रथितोऽसि शूलपाणिः ॥ ११ ॥

ॐ खट्वाङ्गिने नमः

द्रुहिणस्यैकं वदनं मिथ्यावचनं दृष्ट्वा सद्यश्छिन्नं
न ततो वेधोमरणं शंभोः क्व पुनर्हिंसाजन्यं पापम् ।
अथ दण्डार्धं वहसि त्वं तज्जनशिक्षार्थं खट्वाया वा
चरणं यत् तद्विमलं सत्त्वं प्रथितस्तेन त्वं खट्वाङ्गी ॥ १२ ॥

ॐ विष्णुवल्लभाय नमः

वितरन् हरये तपस्यते पदरेखाजनितं सुदर्शनम् ।
वपुरर्धमपि प्रियाय ते प्रथितस्त्वं भुवि विष्णुवल्लभः ॥ १३ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

y eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundatio

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

ॐ शिपिविष्टाय नमः

पशवः परमात्मनि धीविरहात्
द्विपदोऽपि नराश्च सुराः शिपयः ।
तदनुग्रहकृद्धृदयं प्रविशन्
प्रथितोऽसि विभो शिपिविष्ट इति ॥ १४ ॥

ॐ अम्बिकानाथाय नमः

नाथसि हिमाचलसुमां
मनसा तां नाथसेऽथवा नाथः ।
प्रकटोऽसि देविकायां
लिङ्गे तेनाम्बिकानाथः ॥ १५ ॥

ॐ श्रीकण्ठाय नमः

क्ष्वेलं गङ्गामिन्दोर्लेखामाद्योत्थां वा कान्तिं कण्ठे ।
बिभ्रन् माण्डव्येशे लिङ्गे विख्यातोऽसि त्वं श्रीकण्ठः ॥ १६ ॥

ॐ भक्तवत्सलाय नमः

दासानुरस्यावपसीति तर्णकान्
भक्तात्मकानोदनबालकोभयम् ।
पोषाय गृह्णास्यथ तेषु सौहृदं
पुष्णासि तस्मादसि भक्तवत्सलः ॥ १७ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

y eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundatio

सच
सवि

यदे

अभि

ऊध
अन्त

दध
कालं

मति
समस

उच्च
प्रव्य

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

ॐ भवाय नमः

सत्तामात्रमधिष्ठानमुपादानमसि विश्वस्य ।
सलिलस्याधिष्ठात्री मूर्तिस्तव तेन विश्रुतोऽसि भवः ॥ १८ ॥

ॐ शर्वाय नमः

यदेतदाभाति बहुप्रकारं
जगत्तदन्ते सकलं शृणासि ।
अधिष्ठितो मध्यमदेशलिङ्गे
धरण्यधिष्ठातृतयापि शर्वः ॥ १९ ॥

ॐ त्रिलोकेशाय नमः

ऊर्ध्वाधोमध्यभुवाममरासुरमानवप्रकरनिबिडानाम् ।
अन्तर्यमनात् त्रिपुटीसाक्षितया शंकर त्रिलोकीशस्त्वम् ॥ २० ॥

ॐ शितिकण्ठाय नमः

दधदधिगलमिन्द्रपविप्रहृतिप्रभवं कालम् ।
कालंजरगिरिशिखरे प्रथितस्त्वं शितिकण्ठः ॥ २१ ॥

ॐ शिवाप्रियाय नमः

मतिर्धृतिः कृतिर्बलं शरीरमिन्द्रियं मनः ।
समस्तमेव ते शिवा भवानतः शिवाप्रियः ॥ २२ ॥

ॐ उग्राय नमः

उच्चयस्यन्तर्निखिलजनानामुद्गच्छस्यप्यथ जगदूर्ध्वम् ।
प्रव्यक्तः सन् कनखललिङ्गे वायोरन्तर्वसंसि तदुग्रः ॥ २३ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

y eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundatio

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

ॐ कपालिने नमः

कमलभवकरोटिव्रातमालाधरत्वात्
तदधिकचलशाली भासि कङ्कालनाथः ।
परशिव करवीरक्षेत्रमध्यस्थलिङ्गे
निवससि सुरवन्द्यो नामतस्त्वं **कपाली** ॥ २४ ॥

ॐ कामारये नमः

कर्पूरश्वेत त्वं कामेच्छोर्दूरे निष्कामानामासन्नः ।
दर्पं कंदर्पस्य प्रक्षिण्वन् विख्यातोऽभूल्लोके **कामारिः** ॥ २५ ॥

ॐ अन्धकासुरसूदनाय नमः

लीलया जगदम्बया पिहितेषु ते नयनेष्वभू-
दन्धकारत एव यः स तु भैरवेण निषूदितः ।
तादृशः कृपया त्वया शिव गाणपत्यमवापितः
प्रेमवानपि नामतः पुनर**न्धकासुरसूदनः** ॥ २६ ॥

ॐ गङ्गाधराय नमः

अमरतटिनी निजं बलमेवेक्ष्य गर्वाद्भव-
च्छिरसि गगनादपीपदतीव वेगोद्धुरा ।
पटुतरजटाटवीमुपगता न दृष्टा क्वचित्
परमशिव तां दधन्निगदितोऽसि **गङ्गाधरः** ॥ २७ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

y eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundatio

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

ॐ ललाटाक्षाय नमः

उडुरविशशिसंहर्ता प्रलयसमयसप्तार्चिः ।
तमुपरि नयने बिभ्रद् भव भवसि **ललाटाक्षः** ॥ २८ ॥

ॐ कालकलाय नमः

मार्कण्डेयः कालमुखाद् विमुक्तो
दग्धो रुद्रः काल इति प्रसिद्धः ।
तुर्यां मूर्तिं बिभ्रदुमाधिनाथ
प्रख्यातोऽसि त्वं भुवि **कालकालः** ॥ २९ ॥

ॐ कृपानिधये नमः

दैतेयेषु जलंधरादिषु
स्वीयानामपकारकेष्वपि ।
सालोक्यानि पदानि दित्ससि
त्वं ख्यातोऽसि ततः **कृपानिधिः** ॥ ३० ॥

ॐ भीमाय नमः

भिया वातो वाति ज्वलनदिनकरौ शक्रमृत्युप्रचेतो-
मुखा देवास्त्वत्तो भवचकितहृदस्तत्पराः स्वस्वकार्ये ।
नभोऽधिष्ठात्री ते तनुरिति विदुला सप्तगोदावरे च
प्रतीतस्त्वं लिङ्गे गिरिवरतनयानाथ तेनासि **भीमः** ॥ ३१ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

y eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundatio

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

ॐ परशुहस्ताय नमः

अमोघचरितत्त्वं व्यनक्ति परशुस्ते ।
शिवागमवचोभिस्ततः **परशुहस्तः** ॥ ३२ ॥

ॐ मृगपाणये नमः

दारुवनस्थैस्त्वाभिचरद्भिः प्रेषित एणो वेदशरीरः ।
याचनमुद्रा वा तव हस्ते तत्प्रथितोऽसि त्वं **मृगपाणिः** ॥

ॐ जटाधराय नमः

विविधतनुको दक्षध्वंसे बभूविथ यः पुरा
मृगमनुययाचे कोऽन्यस्तु स्थितो मखमण्डपे ।
अखिलसरितः पारावारान् पवित्रतरान् धरान्
शिरसि कचतापन्नान् बिभ्रुच्छ्रुतोऽसि **जटाधरः** ॥ ३४ ॥

ॐ कैलासवासिने नमः

हरेर्मूर्ध्नि मेरौ हिमे मन्दराद्रौ
भवत्केलिभूम्यो भवत्कर्मगम्याः ।
तदूर्ध्वं परा ज्ञानलभ्यास्ति तासु
स्थितस्त्वेन जातोऽसि **कैलासवासी** ॥ ३५ ॥

ॐ कवचिने नमः

वर्माभावे परशरनयनैः स्पृश्यो दृश्यो भवति हि सकलः ।
स्वातन्त्र्येण द्वयमपि तिरयन् दुष्प्रापत्वाद् भवसि **कवची** ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

y eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundatio

बो

दुष्

स्थू

यद्व

त्वं

तेन

नन्द्य

धर्मः

२

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

ॐ कठोराय नमः

घोरैका ते तनुरन्या शिवेति
 द्वे ते बिभ्रज्जगतां रक्षकोऽसि ।
दुष्टा जीवा दमनेनैव रक्ष्याः
 पूर्णत्वाद्वा कथितस्त्वं **कठोरः** ॥ ३७ ॥

ॐ त्रिपुरान्तकाय नमः

स्थूलं लिङ्गं कारणमिति यत् त्रयं वपुषां नृणां
 भक्तानां चेत् तदखिलमपि त्वमन्तयसि क्षणात् ।
यद्वा नाथ त्रिपुरदहनादलौकिकचर्यया
 श्रीशैलेऽसि प्रथिततनुमानिति **त्रिपुरान्तकः** ॥ ३८ ॥

ॐ वृषाङ्काय नमः

त्वं गवामनयतः कुपितोऽपि
 प्रार्थितोऽसि सुकृतेन वृषेण ।
तेन तद्ध्वजरथो वृषशैले
 विश्रुतोऽस्युभयथापि **वृषाङ्कः** ॥ ३९ ॥

ॐ वृषभारूढाय नमः

नन्द्यारोहात् त्रैपुरदाहे हरिणा पृष्ठे
 वेदाश्वानां गोवृषरूपेण समूढत्वात् ।
धर्मज्ञानैश्वर्यविरागेषु निरूढत्वाद्
 विख्यातोऽसि त्वं सुरवृन्दे **वृषभारूढः** ॥ ४० ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

y eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundatio

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

ॐ भस्मोद्धूलितविग्रहाय नमः

स्वाङ्गे भस्म विलिम्पन्नाथ
ज्ञानाङ्गशिरोव्रतमुपदिशसि ।
भूतेशाभिधतीर्थेऽपि त्वं
भस्मोद्धूलितविग्रहनामा ॥ ४१ ॥

ॐ सामप्रियाय नमः

चन्दनस्पर्शशीतामृतस्यन्दिनी
सान्त्ववाक् सामवेदोऽथ सामानि वा ।
तैः प्रयुक्तैरतीवेश संप्रीयसे
गीयसे तेन लोकेषु सामप्रियः ॥ ४२ ॥

ॐ स्वरमयाय नमः

षड्जोदात्तमुखाः स्वरा अवयवा वेदैकवपुषः
साम्ब व्यञ्जनको भवान् स्वरमयी शक्तिस्तव मता ।
ओंकारावयवेषु मप्रभृतयो रुद्रेश्वरशिवः
सर्वे यस्य विभूतितां विदधते सोऽपि स्वरमयः ॥ ४३ ॥

ॐ त्रयीमूर्तये नमः

साम्ब ऋग्वेदकोऽस्या गलन्ता-
दा च नाभेर्यजुर्वेदरूपः ।
नाभिदेशादधः सामवेद-
स्तेन तेऽभूत् त्रयीमूर्तिनामा ॥ ४४ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

y eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundatio

ईश्व
तस्य

षड्
सर्वा

अन्त
भूय

भास

भान

दुग्ध

चेतस
ह

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

ॐ अनीश्वराय नमः

ईश्वरत्वावधिर्यः स सर्वेश्वरः ।
तस्य नेशः परं त्वं ततोऽनीश्वरः ॥ ४५ ॥

ॐ सर्वज्ञाय नमः

षट्त्रिंशत्तत्त्वी त्वय्येवाध्यस्ता ।
सर्वाधिष्ठानं तत्त्वं सर्वज्ञः ॥ ४६ ॥

ॐ परमात्मने नमः

अन्तर्यमयंस्त्वं भूतान्यखिलानि ।
भूयः कथितोऽसि श्रुत्या परमात्मा ॥ ४७ ॥

ॐ सोमसूर्याग्निलोचनाय नमः

भास्वदादयो लोचनानि ते
मानसातिगं त्वां विदन्ति नो ।
भान्तमन्वमी भान्ति सांप्रतं
तेन सोमसूर्याग्निलोचनः ॥ ४८ ॥

ॐ हविषे नमः

दुग्धमात्रस्य कुहरे यथा घृतं
प्राणिमात्रस्य दहरे तथा भवान् ।
चेतसा संमथित एव लभ्यते
हूयमानं त्वमखिलं ततो हविः ॥ ४९ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

y eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundatio

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

ॐ यज्ञमयाय नमः

वेदः पादो यूपो दंष्ट्रानलचयनरसनवदनस्तनूरुहधर्मकः
स्रौवश्चञ्चुः सर्पिर्नासो दिवसरजनिनयनयुगः करः सवनत्रयम् ।
औद्गात्रान्त्रो वेदीस्कन्धश्चरणयुगलमुपनिषदः प्रवर्ग्यकचभ्रमि-
र्वक्षोदाक्षिण्यो मन्त्रस्फिग्विविधमखकरणतनुकोऽसि यज्ञमयाभिधः ॥

ॐ सोमाय नमः

मूर्तिस्त्वष्टास्वीश तवैका रजनीशो
ज्योतिष्टोमस्तस्य हविश्चैडविडश्च ।
सौराष्ट्रस्थस्त्वं शिव गङ्गायमुनस्थो
गौर्या साकं नित्यविहारीति च सोमः ॥ ५१ ॥

ॐ पञ्चवक्त्राय नमः

सर्वेश ब्रह्मतत्त्वेन्द्रियविषयकलाभूतसादाख्यमूर्ति-
ष्वेकैकश्येन पञ्चात्मसु तव वदनेष्वादिहीनेषु सत्सु ।
योऽयं सुन्दोपसुन्दासुरहननिमित्ताप्सरस्तल्लजेक्षा-
प्रादुर्भावः स तद्वक्त्यतिरभसकृतेऽजायथाः पञ्चवक्त्रः ॥

ॐ सदाशिवाय नमः

यो विधीश्वरदृशा सदाशिव-
स्तादृशोऽपि खलु यः सदाशिवः ।
तस्य कालकलना कुतस्तदि-
त्यौपचारिकतया सदाशिवः ॥ ५३ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

y eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundatio

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

ॐ विश्वेश्वराय नमः

केवलं चिन्मयज्योतिरात्मैव काशी
तेन सर्वाणि विश्वान्यतीतापि विश्वम् ।
तत्र वासात् परिच्छेदबुद्ध्या गृहीतः
काशिकाधीश्वरोऽपीश विश्वेश्वरस्त्वम् ॥ ५४ ॥

ॐ वीरभद्राय नमः

श्रीगौर्या वीरः स्वीकृतः पुत्रबुद्ध्या
क्रोधाग्निस्वेदोत्पादितो भद्रनामा ।
भद्रायोगाद्वा राजपूर्वासशाली
तद्वांस्तद्रूपस्त्वं ततो वीरभद्रः ॥ ५५ ॥

ॐ गणनाथाय नमः

शशिकरगुणमुखसंख्यानां
प्रमथतुषितमयमुख्यानाम् ।
अधिपतिरसि शिव कैलासे
पुरि निवसति गणनाथस्त्वम् ॥ ५६ ॥

ॐ प्रजापतये नमः

अन्तरिक्षभूमिनाकसंस्थिता
याः सहस्रशः सहस्रसंमिताः ।
रुद्रनामिकाः प्रजाः सृजस्यतः
स्थाणुनामको भवान् प्रजापतिः ॥ ५७ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

y eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundatio

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

ॐ हिरण्यरेतसे नमः

त्वद्वीर्ययोगेन भवेद्धिरण्यं
यद्वाग्निरूपोऽस्यथवा नलार्धे ।
त्यक्तेन वीर्येण बभूव हैम-
मण्डं तदीशासि हिरण्यरेताः ॥ ५८ ॥

ॐ दुर्धर्षाय नमः

कैलासे शिखरिणि पौलस्त्य-
प्रागल्भ्यं तृणसमतामाप ।
एवं सत्यभिभवकारी क-
स्तस्मात् त्वं भवसि हि दुर्धर्षः ॥ ५९ ॥

ॐ गिरीशाय नमः

भूरिगुणे पदवाक्ये निष्कलुषे सुसमर्थः ।
पर्वतराडपि शंभो तेन मतोऽसि गिरीशः ॥ ६० ॥

ॐ गिरिशाय नमः

मेरुपर्वतमसि धनुर्हेतवे कृशयसितराम् ।
पर्वते निवससि सुखं नाथ तद्भवसि गिरिशः ॥ ६१ ॥

ॐ अनघाय नमः

दुःखं नाथ न ते पापं च व्यसनम् ।
त्रैलोक्याधिपते तस्मादस्यनघः ॥ ६२ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

y eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundatio

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

ॐ भुजङ्गभूषणाय नमः

अभिचारसमर्थदारुकावनगैः प्रहितानहीन् दधत् ।
गरुडादपि बिभ्यतस्तनौ कथितोऽसि **भुजङ्गभूषणः** ॥ ६३ ॥

ॐ भर्गाय नमः

भर्ज्यन्ते दुरितानां संदोहा यदवाप्त्या ।
गायत्रीप्रतिपाद्यस्त्वं तस्मादसि **भर्गः** ॥ ६४ ॥

ॐ गिरिधन्वने नमः

वाग्विषये त्वं मेरुरिव भवसि त्वां हि मनागभिवदति न वाचो
दिव्यरथे वा पुरदहनविधौ वेदमयाः किल चतुरतुरङ्गाः ।
चक्रयुगं ते दिनरजनिकरौ बाणशरीरभृदभवदुपेन्द्रो
मेरुरभूत् ते धनुरुरगपतिर्ज्याभवदीश तदसि **गिरिधन्वा** ॥

ॐ गिरिप्रियाय नमः

प्रेम भूरि ते विभाति वैदिकस्तवात्मवाचि ।
सर्वपर्वतेष्वपीति नामतो **गिरिप्रियो**ऽसि ॥ ६६ ॥

ॐ कृत्तिवाससे नमः

वाराणस्यां शिव त्वद्भक्तांस्तुदन्तं गजेन्द्रं
विप्रोत्सृष्टाभिचारव्याघ्रं च शूलेन हत्वा ।
चर्मद्वन्द्वं तदीयं प्रावृत्य विभ्राजमानो-
ऽस्येकाम्रे चन्द्रलेखामौले ततः **कृत्तिवासाः** ॥ ६७ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

ॐ पुरारातये नमः

भवान् पूर्वमाभाति पश्चादिदं
जगद्भाति यद्वा पुराणामरिः ।
तनोः कारणस्थूलसूक्ष्मात्मनो
विनाशेन वा ते पुरारातिता ॥ ६८ ॥

ॐ भगवते नमः

पराक्रममती विरागयशसी
श्रिया सह जगत्पतित्वमिति षट् ।
गुणा भवपदोचितास्त्वयि वस-
न्त्यतः श्रुतिगिरेरितोऽसि **भगवान्** ॥ ६९ ॥

ॐ प्रमथाधिपतये नमः

मथ्नन्तितरां यदवैदिकांस्त्वत्पारिषदाः प्रमथा मताः ।
तानीश सदा परिपालयन् भक्तैरुदितः **प्रमथाधिपः** ॥

ॐ मृत्युंजयाय नमः

रुद्राच्युतेशब्रह्मणां कोट्यो यया गीर्णाः क्षणात् ।
तद्गोचरो न त्वं विभो तेनाभावो मृत्युंजयः ॥ ७१ ॥

ॐ सूक्ष्मतनवे नमः

दुर्ज्ञेयमूर्तिधरोऽप्याम्नातके प्रकटः ।
सूक्ष्मादपीश कृशस्तेनासि **सूक्ष्मतनुः** ॥ ७२ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

ॐ जगद्व्यापिने नमः

सत्ता भानं प्रियमिति चानुस्यूतं
सर्वेष्वर्थेष्वनुभवसिद्धं लोके ।
सच्चित्सौख्यं त्रयमपि यौष्माकीणं
रूपं तस्मात् भवसि जगद्व्यापीति ॥ ७३ ॥

ॐ जगद्गुरवे नमः

वटतरुनिकटे मुनीनखिलान् सुरान्
कमलभवमुखान् प्रबोधनमुद्रया ।
उपदिशसि परं महस्तव दक्षिणा-
मुख परशिव तन्मतोऽसि जगद्गुरुः ॥ ७४ ॥

ॐ व्योमकेशाय नमः

पृथ्वीपाथोज्वलनपवनव्योमरूपेषु भूते-
ष्वल्पाल्पानि प्रथमगदितान्युत्तराणीशितॄणि ।
व्योम्नोऽपीशोऽस्यथ च गगनं कुन्तलास्ते विराजो
गङ्गाधारा वियदिव जटास्तेन च व्योमकेशः ॥ ७५ ॥

ॐ महासेनजनकाय नमः

सुब्रह्मण्येन पृष्टे प्रणवपरमार्थोऽत्र क इति
ब्रह्मण्यब्जेक्षणे स्वं दिशति सति कारानियमिते ।
आत्मा वै पुत्रनामेत्युपदिशति तौ मोचितवति
त्वय्यब्जाक्षाजपुत्रैः स्तुत इति महासेनजनकः ॥ ७६ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

ॐ चारुविक्रमाय नमः

परशिव त्वया ये निषूदिता
गजजलंधरत्रैपुरादयः ।
अपुनरागमं ते पदं गता-
स्तव चमत्कृतश्चारुविक्रमः ॥ ७७ ॥

ॐ रुद्राय नमः

बालो धातृललाटाज्जातः सन्नरुदस्त्वं
सोऽरोदीद्यदरोदीदग्नित्वादपि रुद्रः ।
उल्लाघीकरणाद्वा निश्चिन्तीकरणाद्वा
संवर्ते रोदयसि ब्रह्मादीनिति रुद्रः ॥ ७८ ॥

ॐ भूतपतये नमः

धरणीजलादिषु तथात्मगणे-
ष्वनुविश्य तान् नियमयन् नटसि ।
अथवा पिशाचनिकरान्नटयन्
भुवनावनाय ननु भूतपतिः ॥ ७९ ॥

ॐ स्थाणवे नमः

वृक्षाभः स्तब्धो दिवि भुवि पुर उद्दिश्य
स्फारं वर्षाणि स्थिरतर उदतिष्ठस्त्वम् ।
ज्योतिर्लिङ्गेऽपि प्रभवति सति नैश्चल्यात्
कल्पान्ते वातैर्न चलसि तदसि स्थाणुः ॥ ८० ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

ॐ अहये बुध्न्याय नमः

ब्रह्माण्डस्याधो दशशतफणो बुध्न्यभावं प्रयाते
पाताले साधुर्वहति वसुधां सार्णवद्वीपशैलाम् ।
तन्मूर्धभ्योऽन्ते विषमयवपुः कालसंकर्षणाख्यो
रुद्रो भूत्वेदं दहसि निखिलं सोऽस्यहिर्बुध्न्यनामा ॥

ॐ दिगम्बराय नमः

महेश दारुकावने महर्षिसिद्धसेविते
तदङ्गनाः पतिव्रताः परीक्षमाणया धिया ।
मनोभवातिशायिनीं मनोहरां दधत्तनु-
मुपागतस्तदाश्रमेषु भिक्षितुं दिगम्बरः ॥ ८२ ॥

ॐ अष्टमूर्तये नमः

मेदिनी भूतमभिमन्यसे शर्व इति पाथसो भवपदेनाभिमानी
रुद्रनाम्ना तु वैश्वानरस्योग्र इति मारुतं भीम इत्यम्बरस्य ।
भानुमीशान इति शीतभानुं महादेव इत्यात्मनो यज्वनो वा
मन्यसे पशुपतीभूय शंभो जगद्व्याप्य तिष्ठन् भवत्यष्टमूर्तिः ॥

ॐ अनेकात्मने नमः

यत् किंचिद् ब्रह्माण्डे सर्वं वै रुद्रस्तत् ।
संख्येयत्ताभावाद् विख्यातोऽनेकात्मा ॥ ८४ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

ॐ सात्त्विकाय नमः

त्वयि निवसति जन्तुरस्तिता-
गुण इति तानि तव प्रयोजनम् ।
त्वमपि भवसि तेषु तद्वपुः
परशिव तेन मतोऽसि सात्त्विकः ॥ ८५ ॥

ॐ शुद्धविग्रहाय नयः

घनघृतमिव सत्त्वमात्रपिण्डो
न तु वपुरण्वपि ते रजस्तमोऽक्तम् ।
शिव भवसि न चैव कूटयोधी
हरसि मलानिति शुद्धविग्रहस्त्वम् ॥ ८६ ॥

ॐ शाश्वताय नमः

पूर्वतो जगतो जनेः सर्वसंहारतः परे ।
वर्तमाने जगत्यपि त्वमस्येवेति शाश्वतः ॥ ८७ ॥

ॐ खण्डपरशवे नमः

गजासुरवधे खण्डास्तव जाताः परशवः ।
तदारभ्याखिलैर्देवैर्गीयसे खण्डपरशुः ॥ ८८ ॥

ॐ अजाय नमः

न जनिः शिव ते ।
तदसि त्वमजः ॥ ८९ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

ॐ पाशविमोचकाय नमः

अभिमतिगुणपञ्चपरुर्दश-
त्रिचतुरयुतविंशतिपाशतः ।
शिवपदभजनेन विमोचयन्
पशुगणमिति **पाशविमोचकः** ॥ ९० ॥

ॐ मृडाय नमः

यज्ञे पूर्णे सुहिते पूर्णाहुत्या त्वयि सुहिते ।
यष्टॄन् ध्यातॄनपि सुखयस्यार्यानेवस्तदसि **मृडः** ॥ ९१ ॥

ॐ पशुपतये नमः

ख्यातं तन्त्रेषु पाशः पशुरथ मतिरित्येतत् त्रयमपि
त्वद्रूपं नाथ जीवान्नियमसि नुतो मुक्तांश्च कुरुषे ।
ग्राम्यारण्याधिपत्यं वहसि च यजमानात्माभिमतिमान्
भक्तान् नेपालपीठे रमयसि निवसन्नासीः **पशुपतिः** ॥ ९२ ॥

ॐ देवाय नमः

द्युतिमोदव्यवहारात् सुरजातिष्ववातरात् ।
शशिमैले जगतीनामधिपत्वादपि **देवः** ९३ ॥

ॐ महादेवाय नमः

गीर्वाणानामपि मधुहादीनां
नमनीयः स्तवनीयस्त्वं देवः ।
शशिबिम्बेऽधिष्ठात्री तव मूर्ति-
र्जगदाप्याययतीति **महादेवः** ॥ ९४ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

ॐ अव्ययाय नमः

न जायसे परिणमसि प्रवर्धसे
न हीयसे न च विकृतोऽसि नश्यसि ।
त्वमव्ययैर्दशभिरपि क्षमादिभिः
परिष्कृतः परशिव तेन चाव्ययः ॥ ९५ ॥

ॐ हरये नमः

परशिव तव नामसंकीर्तनं
कलिकलुषितचेतसां पावनम् ।
निवससि नगरे हरिश्चन्द्रके
हरसि च दुरितानि स त्वं हरिः ॥ ९६ ॥

ॐ पूषदन्तभिदे नमः

अधिमखं रदविकासपूर्वकं
परिहसन्तमवलोक्य पूषणम् ।
शिव भवानकृत पिष्टभागिनं
गलितदन्तमिति पूषदन्तभित् ॥ ९७ ॥

ॐ अव्यग्राय नमः

पौलस्त्येनोन्नमनसमये कैलासाद्रे-
र्ब्रह्माण्डानामपि दहनकाले संवर्ते ।
युद्धेष्वन्येष्वपि बहुषु संतोषोद्रेकाद्
देवीं पश्यन्नटसि शिव तस्मादव्यग्रः ॥ ९८ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

ॐ दक्षाध्वरहराय नमः

पुरा देवो दक्ष इति शिव तवैकः श्वशुरकः
परो मर्त्यो दक्ष इति विटपिकन्योदरभवः ।
प्रचेतःपुत्रोऽखिलमखदातापि च भवां-
स्तयोर्यज्ञौ हा व्यदलयदिति **दक्षाध्वरहरः** ॥ ९९ ॥

ॐ हराय नमः

परशिव जनयसि भव इति भणितः
स्थिरमपि चरयसि मृडपदगणितः ।
चरमचरमपि चरमगुणधरः
प्रहरसि जगदिदमखिलमिति **हरः** ॥ १०० ॥

ॐ भगनेत्रभिदे नमः

विष्णुब्रह्माद्यखिलदिविषद्वृते मखमण्डपे
वीरं भद्रापतिमुपगतं सुरासुरमर्दनम् ।
कोपाटोपादरुणनयनो भगस्तमदीदृशत्
तन्नेत्रे स प्रसभमभिनत् ततो **भगनेत्रभित्** ॥ १०१ ॥

ॐ अव्यक्ताय नमः

सांख्ये मूलप्रकृतिरिति यदाचख्यौ यत्
पाराशर्यश्चिदिति गदति तत्त्वं तत्त्वम् ।
सामष्ट्यं चाक्षरमपि भुवि नैष व्यक्तं
लिङ्गं बाणाभिधमपि शिव इत्यव्यक्तः ॥ १०२ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

ॐ सहस्राक्षाय नमः

अगणितकरचरणशिरोदंष्ट्रोदरयुक्प्रतिभयमाश्चर्यं
युगपत् सृष्टिस्थितिलयकारि च यदवच्छेदकभेदेन ।
क्षेत्रे च सुवर्णाख्ये प्रथितं लिङ्गे शिव तव यद्रूपं
बहुविधकर्मज्ञानेन्द्रियपरिपूर्णं तदिति **सहस्राक्षः** ॥ १०३ ॥

ॐ सहस्रपदे नमः

जगदवनार्थमष्टसु धृतासु मूर्तिषु
स्मरहर भास्करस्य तव मूर्तिरष्टमी ।
गणनपथातिगाङ्घ्रिमयविश्वरूपधृत्
श्रुतिगदितोऽसि शंकर ततः **सहस्रपात्** ॥ १०४ ॥

ॐ अपवर्गप्रदाय नमः

प्रतीकविदहंग्रहो भृतक इत्युपास्तेर्निजाद्
विधेः शिवसलोकता शिवतदात्मता सार्ष्टिता ।
भवन्ति ससमीपता अमृततात्मविज्ञानतो-
ऽखिलं फलमतो भवेदिति मतोऽ**पवर्गप्रदः** ॥ १०५ ॥

ॐ अनन्ताय नमः

नात्रेति विभो नेदानीमिति नेदं
ब्रह्मेति न वाचो यत्र प्रसरन्ति ।
नास्त्येव गुणानामन्तो न विभूतेः
शेषोऽसि धराधृत् तेन त्वम**नन्तः** ॥ १०६ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

ॐ तारकाय नमः

तव पदकमले भजन्तो जनास्तारिता यत् त्वया
भवजलनिधितो महादेव ताराख्यवर्णात्मकः ।
प्रणवमुपदिशन् द्विजान् काशिकायां परेतानपि
श्रुतिषु निगदितस्तदन्वर्थनामाभवत् **तारकः** ॥ १०७ ॥

ॐ परमेश्वराय नमः

ग्रामाणां पतयोऽपि सोपपदेश्वरा भुवि भूरिश-
स्तेऽपि स्वाश्रितमात्रपोषपरास्तथैव दिवौकसः ।
ईशानामपि चेशितानि निजाश्रिताश्रिततच्छ्रितान्
सर्वानप्यवसीशतापरमावधिः **परमेश्वरः** ॥ १०८ ॥

जानाति साम्ब तव धामरुचिं दधीचि-
र्जानाति ते पदनखाग्रबलं दशास्यः ।
जानाति दोर्बलपराक्रममेष मेरु-
र्जानन्त्यमोघपटुबाणगतिं पुराणि ॥ १ ॥

इयं शंभोरष्टोत्तरशतकनामार्थविवृति-
र्विजातीयैरष्टोत्तरशतकवृत्तैर्विरचिता ।
फलं नामस्वर्थावगतिषु च भूम्नेव विहितं
बहूनां वृत्तानां प्रमितिरधिकाप्यत्र फलति ॥ २ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

इति काशिनिवासिसाग्निचित्य-
क्रतुकृद् भास्कररायभारती ।
जनुषः सफलत्वसिद्धये
शिवनामाष्टशतं व्यवर्वरीत् ॥ ३ ॥

इति श्रीमत्पदवाक्यप्रमाणपारावारीण-
भारत्युपनामक श्रीगम्भीररायसूरि-
सूनुना श्रीभास्करसयाग्निचितो-
न्नीतं श्रीशिवाष्टोत्तरशतनाम-
स्तोत्रकल्पलताव्याख्यानं
रत्नावालं संपूर्णम्

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

ॐ नमः शिवाय

श्रीभास्कररायाग्निचित्कृतः

श्रीशिवस्तवराजः

श्रीबोधानन्दपदं बोधानन्दपदयुजं याचे ।
अन्वर्थपदमहीयसि याच्ना विफला भवेन्नैव ॥ १ ॥

सच्चित्पुंस्त्रीस्फूर्तिं शिवमूर्तिं कृतनतेष्टसंपूर्तिम् ।
कबलितभवमोहार्तिं कलये श्रीदक्षिणामूर्तिम् ॥ २ ॥

यस्य श्रीचिन्मुद्रानतहृद्राजीवगाढतरनिद्राम् ।
विद्राव्य दिशति पदवीं भद्रां तस्मै नमोऽस्तु मे नित्यम् ॥ ३ ॥

यो मौनी मौनिगुणान् विरचयति प्रोद्यदुन्मनीविभवान् ।
अनुभूताखण्डरसान् तस्य श्रीपादुकामहं सेवे ॥ ४ ॥

वटतरुमूलनिषण्णं पटुतरविज्ञानदेशिकेन्द्रपटुम् ।
मोहतिमिरार्कपटलं वाङ् मे स्तोतुं महानटं नटतु ॥ ५ ॥

यद्रत्नद्युतिपटलैः शमितनिजोद्योगमहिमानः ।
सवितारो गतरागास्तस्मै मकुटाय शांभवाय नमः ॥ ६ ॥

यो मकुटविविधरत्नप्रतिबिम्बितनिखिलविश्वगणरूपः ।
प्रकटयति विश्वमध्यगलीलां तस्मै नमो महामहसे ॥ ७ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

त्वन्मुखलावण्यसुधासिन्धौ मकुटप्रभाधुनीबन्धौ ।
शैवालावृतरत्नद्वीपस्फुरणं तनोति हि कपर्दः ॥ ८ ॥

हरमकुटघटितहीराः शेखरविधुमभित उज्ज्वलाकाराः ।
आहृतसेवाचारा मिलिता इव भान्ति तारकाकाराः ॥ ९ ॥

अपरशशाङ्कं शङ्के मौलिनिभद्धार्भकेन्दुमकलङ्कम् ।
शिव तव जटाभ्रतटिनी सक्तान् मुखकान्तिवारिधेरुदितम् ॥ १० ॥

शंभो त्वदीयशेखरशशिशकले दृश्यमानसारङ्गम् ।
पाणिसरोरुहविलसत्सारङ्गप्रतिकृतिं मन्ये ॥ ११ ॥

विगतकलं गुरुपत्नीरतमिन्दुं राहुचकितमपि ।
वामेक्षणयसि शंभो शरणगतं तं वतंसयसि ॥ १२ ॥

एकफणितर्जितेन्दुस्तव मौलौ विततसाध्वसश्चरति ।
घोराहिकुलविकीर्णे किं किं कुरुते त्वदाश्रयविलासः ॥ १३ ॥

त्वन्मौलिद्युतिजलधिर्गङ्गासङ्गी विजृम्भते दृष्ट्वा ।
शशिडिम्भकमङ्कगतं पुत्रोत्कर्षो मुदे हि जनयित्रोः ॥ १४ ॥

विहरसि शैवकपर्दे फालाग्नेस्त्रातुमिन्दुबालमिति ।
मन्येऽहमन्तरङ्गे गङ्गे तुङ्गे समुन्नततरङ्गे ॥ १५ ॥

मणिमकुटदीप्तघटितं निटिलं शशिखण्डमित्रमातनुते ।
इन्द्रशरासनलीलां भ्रूयुगमपि तत्र गुणहेलाम् ॥ १६ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

तव दृक्त्रितयविलासः कुर्वन्नपि कृत्यपञ्चकं जगताम् ।
एकमनुग्रहमेव प्रतनोति शिव प्रपन्नेषु ॥ १७ ॥

मिहिरेन्दुपावकानां वसतिर्यस्य प्रकाशते मुक्ता ।
स्फूर्तिमति शुभ्रमूर्तौ शिव तस्य तवाङ्घ्रिकंजरज ईडे ॥ १८ ॥

वामं विलसति नेत्रं करुणारसपात्रमामनताम् ।
हृत्तिमिरहरणमितरन्नैटलमघविपिनदाहकं नूनम् ॥ १९ ॥

कमले चम्पककुवलयसृष्टिरदृष्टाश्रुता च भुवनतले ।
तव शुभवक्त्राम्भोजे चित्रा सा भाति शशिमौले ॥ २० ॥

कुण्डलितकुण्डलीन्द्रं कुंकुमतिलकं च कुन्दरदपङ्क्तिम् ।
कुटिलालककृतपरिचयनिटिलार्धेन्दुं निरन्तरं सेवे ॥ २१ ॥

आस्यं चन्द्रोपास्यं शिव तव नयनं तु नलिनकृतदास्यम् ।
करुणारसप्रशस्यं हास्यं संत्रातभक्तजनसस्यम् ॥ २२ ॥

कम्बुसहोदरकण्ठं बिम्बाधरमम्बुजन्मकरयुगलम् ।
पुंनागनाभिकुहरं पुंनागसपत्नतनुमध्यम् ॥ २३ ॥

करिशुण्डायतबाहुं कल्याणास्थानपीठिकोरस्कम् ।
भूतिविभूषितगात्रं भूतिप्रततिप्रसेविताङ्घ्रियुगम् ॥ २४ ॥

मृदुलकरभोरुकाण्डं जङ्घाजितमदनजैत्रतूणीरम् ।
शोणाम्बुजातचरणं सेवे सिन्दूरपूररुचि चरणम् ॥ २५ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

तव तनुकान्तिविलासैर्विजितः पर्वेन्दुरातबहुरूपः ।
करपदनखस्मितालिकरूपेण भवन्तमेव समुपास्ते ॥ २६ ॥

त्वत्पदमयूखराशिस्तनुते चित्रं वियज्झरीलीलाम् ।
नित्यानन्दोद्वेलां निर्मग्ननिलिम्पतनुमालाम् ॥ २७ ॥

मामव ताण्डवशालिन् कबलितहालाहलिन् दयाशीलिन् ।
शूलिन् कपालमालिन् नतसुरजालिन् मनोभवोन्मूलिन् ॥ २८ ॥

सुरवरसेवित पुरहर गौरीवर सुगुणनिकर गङ्गाधर मे ।
शशिशेखर परशिव हर मृगधर हर सर्वमान्तरं तिमिरम् ॥ २९ ॥

माता पिता च नेता भूतानामन्तरङ्गविज्ञाता ।
साम्ब निखिलेष्टदाता लोकानां त्वमसि मुक्तिसंधाता ॥ ३० ॥

गौरीकुचोपधानं मदवारणचर्मकृतपरीधानम् ।
प्रणतप्रियसंधानं प्रणमामि बुधालिरक्षणविधानम् ॥ ३१ ॥

फणिकल्तियज्ञसूत्रं प्रणतार्तिहर प्रधानचारित्रम् ।
मुखजितकैरवमित्रं परमपवित्रं त्रिणेत्रमहमीडे ॥ ३२ ॥

विषधरजटाकलापं विषमुखहारं विषाङ्कशुभकण्ठम् ।
विषशरकोटिरुचिरं विषयविरक्त्यै वृषध्वजं कलये ॥ ३३ ॥

कलये शिवपूर्वमुखं कालानलविद्युदाभमत्यरुणम् ।
गम्भीरनिनदमिश्रितदहनन्यक्कारिताम्ररदवसनम् ॥ ३४ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

अर्धेन्दुदीप्तिलोलापिङ्गजटाभारनद्धनागकुलम् ।
सिद्धसुरासुरवर्यप्रकरपरीसेव्यमानमत्युग्रम् ॥ ३५ ॥

ईडे दक्षिणवदनं कुटिलभ्रूभङ्गरौद्रमशिवघ्नम् ।
नीलघनभ्रमराञ्जनकान्तिमहेशस्य लोलपिङ्गाक्षम् ॥ ३६ ॥

श्रवणपुटोल्लसितोरगमस्तकमणिदीप्तमृदुकपोलयुगम् ।
सर्पेष्टकर्परावलिशुक्तिव्याकीर्णपञ्चफणिराजम् ॥ ३७ ॥

ध्याये शिवपश्चिममुखमकलङ्कं सकलमतुलसौन्दर्यम् ।
हिमनगविधुकुन्दश्रीसुरभिपयःफेनधवलरुचिम् ॥ ३८ ॥

भस्माभ्यङ्गमनङ्गज्वलनज्वालावलीनेत्रम् ।
ब्रह्मेन्द्रादिमरुद्गणयोगिभिराराधितं स्तुतिप्रवणैः ॥ ३९ ॥

सेवे शिवोत्तरमुखं कुङ्कुमजम्बालितं यजुर्जनकम् ।
व्यापाण्डुगण्डदेशं प्रहसितमास्निग्धबिम्बोष्ठम् ॥ ४० ॥

असितालकं सुतिलकं गौरं कंदर्पकोटिलावण्यम् ।
भ्रूविक्षेपकटाक्षप्रेक्षणसंसक्तकर्णकोकनदम् ॥ ४१ ॥

विनुमः शिवपञ्चमुखमोंकाराद्यखिलमन्त्रततिजनकम् ।
व्यक्ताव्यक्तगुणेतरमक्षरमिति योगिभिर्ध्येयम् ॥ ४२ ॥

षट्त्रिंशतत्त्वरूपं तस्मात् परतत्त्वमपरमकलङ्कम् ।
खव्यापि शान्तमतुलं सकलं तेजोमयं च सूक्ष्मतमम् ॥ ४३ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

सुरतरुमूलोज्ज्वलकररत्नप्रकरासनासीनम् ।
वामाङ्कसंस्थगौरीकुचकुम्भाश्लेषलाञ्छितोरस्कम् ॥ ४४ ॥

शृङ्गाररसमुल्लसदङ्गविलासं सुधांशुशिशुमौलिम् ।
वरपरशुमृगाभयकरममलं शान्तं प्रसन्नमुखम् ॥ ४५ ॥

गजवदनबाहुलेयाश्लिष्टोभयपार्श्वमभिरामम् ।
अनुसंस्मरामि निरतं परमशिवं परमयोगिभिर्ध्येयम् ॥ ४६ ॥

सततोषितमुनिहृदयं संतोषितमदनजीवनकुटुम्बम् ।
निःशेषितमदनशरं निष्पेषितभक्तदुरितमाकलये ॥ ४७ ॥

निगमदरीपञ्चास्यं निस्तुलकमनीयपञ्चास्यम् ।
निलयीकृतहालास्यं विनुमः पञ्चार्णमनुगतमुपास्यम् ॥ ४८ ॥

नित्यानन्दमतर्क्यं निर्द्वन्द्वं शाश्वतं रम्यम् ।
निश्चलनिरीहनिर्गुणनिष्कलमनुसंस्मराम्यचिन्त्यपदम् ॥ ४९ ॥

परमकरुणाविधेयं परशिवमूर्तिं परामृताकारम् ।
चण्डरविकोटिरुचिरं चन्द्रायुतकोटिशिशिरमाकलये ॥ ५० ॥

श्यामाहृतार्धविग्रह तव सुषमाक्रान्ततारनगभूमौ ।
श्यामतृणपूर्णतटिनीतटबुद्ध्या चरति तावकमहोक्षः ॥ ५१ ॥

वसनयति वारणाजिनमृषभं वाहयति तव दयाम्बुनिधे ।
पन्नगमुपवीतयति प्रसादलेशः प्रपन्नानाम् ॥ ५२ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

भसितकपालाजिनफणिवहनात् त्वं व्यक्तभिक्षुवेषोऽपि ।
तावकपरमैश्वर्यं पिशुनयति त्वत्प्रसन्नभूतिगणः ॥ ५३ ॥

गिरिश त्वं गिरिधनुता गिरिजेशत्वं च ते गिरीश त्वम् ।
आर्द्रमपि त्वद्धृदयं शंकर किं ग्रावयन्ति नतविषये ॥ ५४ ॥

चित्रं भवसि कपालिन् करनखमुखलुलितविधिकपाली सन् ।
स्वयमीश विषादी सन् लोकविषादं व्यपोहति स्म भवान् ॥ ५५ ॥

मामकतम इभगर्वं सर्वमपाङ्गेन खड्गपातेन ।
खर्वय ककुभाच्छादन शर्व परीधानचर्म लाभाय ॥ ५६ ॥

भवतो भुवि संत्रातुं भवतो भवतोऽधिको भवेत् कोऽन्यः ।
अत एव भवानीश त्वत्पदशरणो भवामि निरतमहम् ॥ ५७ ॥

संफुल्लाब्जव्यतिकरविधुकरनिकररुचिसंपदुन्मेषः ।
शृङ्गाररसोत्तुङ्गः शिव मयि संस्फुरतु ते कृपापाङ्गः ॥ ५८ ॥

इति श्रीमत्पदवाक्यप्रमाणपारावारीण-
भारत्युपुनामकश्रीगम्भीरराय-
सूरिसूनुना श्रीभास्कररराया-
ग्निचितोन्नीतः शिव-
स्तवराजः संपूर्णः

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

अज
अन्ध
अन
अन
अनं
अने
अप
अरि
अव्य
अव्य
अव्य
अग्र
अहि
उग्र
कठो
कप
कप
कव
काम
काल
कृचि
कृपा

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

नामाऽनुक्रमणिका (१)

	पृष्ठ		पृष्ठ
अजः	२८	कैलासवासी	१६
अन्धकासुरसूदनः	१४	खट्वाङ्गी	११
अनघः	२२	खण्डपरशुः	२८
अनन्तः	३२	गङ्गाधरः	१४
अनीश्वरः	१९	गणनाथः	२१
अनेकात्मा	२७	गिरिधन्वा	२३
अपवर्गप्रदः	३२	गिरिप्रियः	,,
अम्बिकानाथः	१२	गिरिशः	२२
अव्यग्रः	३०	गिरीशः	,,
अव्यक्तः	३१	चारुविक्रमः	२६
अव्ययः	,,	जगद्गुरुः	२५
अष्टमूर्तिः	२७	जटाधरः	१६
अहिर्बुध्न्यः	,,	जगद्व्यापी	२५
उग्रः	१३	तारकः	३३
कठोरः	१७	त्रयीमूर्तिः	१८
कपर्दी	१०	त्रिपुरान्तकः	१७
कपाली	१४	त्रिलोकेशः	१३
कवची	१६	दक्षाध्वरहरः	३१
कामारिः	१४	दिगम्बरः	२७
कालकालः	१५	दुर्धर्षः	२२
कृत्तिवासाः	२३	देवः	२९
कृपानिधिः	१५	नीललोहितः	१०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

	पृष्ठ
पञ्चवक्तः	२०
परमात्मा	१९
परमेश्वरः	३३
परशुहस्तः	१६
पशुपतिः	२९
पाशविमोचकः	२९
पिनाकी	९
पुरारातिः	२४
पूषदन्तभित्	३०
प्रजापतिः	२१
प्रमथाधिपः	२४
भक्तवत्सलः	१२
भगनेत्रभित्	३१
भगवान्	२४
भर्गः	२३
भवः	१३
भस्मोद्धूलितविग्रहः	१८
भीमः	१५
भुजङ्गभूषणः	२३
भूतपतिः	२६
महादेवः	२९
महासेनजनकः	२५
महेश्वरः	९
मृगपाणिः	१६
मृडः	२९
मृत्युंजयः	२४

	पृष्ठ
यज्ञमयः	२०
रुद्रः	२६
ललाटाक्षः	१५
वामदेवः	१०
विरूपाक्षः	,,
विश्वंभरः	२१
विष्णुवल्लभः	११
वीरभद्रः	२१
वृषभारूढः	१७
वृषाङ्कः	,,
व्योमकेशः	२५
शंकरः	११
शंभुः	९
शर्वः	१३
शशिशेखरः	९
शाश्वतः	२८
शितिकण्ठः	१३
शिपिविष्टः	१२
शिवः	८
शिवाप्रियः	१३
शुद्धविग्रहः	२८
शूलपाणिः	११
श्रीकण्ठः	१२
सदाशिवः	२०
सर्वज्ञः	१९
सहस्रपाद्	३२

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

सह
सा
सा
सू
सो
सो

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

	पृष्ठ		पृष्ठ
सहस्राक्षः	३२	स्थाणुः	२६
सात्त्विकः	२८	स्वरमयः	१८
सामप्रियः	१८	हरः	३१
सूक्ष्मतनुः	२४	हरिः	३०
सोमः	२०	हविः	१९
सोमसूर्याग्निलोचनः	१९	हिरण्यरेताः	२२

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation; J

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, J

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga
CC-0. In Public Domain Sri Aurobindo Library, Pondicherry